# Shri Ramadandakam

# શ્રીરામદણ્ડકમ્

## Document Information

Text title : Shri Ramadandakam

File name : rAmadaNDakam.itx

Category : raama, daNDaka

Location : doc_raama

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : January 18, 2020, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીરામદણ્ડકમ્

શ્રીરામધ્યાનમ્ ।
હત્વા યુદ્ધે દશાસ્યં ત્રિભુવનવિષમં વામહસ્તેન ચાપં
ભૂમૌ વિષ્ટભ્ય તિષ્ઠન્નિતરકરધૃતં ભ્રામયન્બાણમેકમ્ ।
આરક્તોપાન્તનેત્રઃ શરદલિતવપુઃ કોટિસૂર્યપ્રકાશો
વીરશ્રીબન્ધુરાઙ્ગસ્ત્રિદશપતિનુતઃ પાતુ માં વીરરામઃ ॥

અથ શ્રીરામદણ્ડકં સ્તોત્રમ્ ।
ૐ શ્રીરામપરબ્રહ્માણે નમઃ ।
શ્રીમદખિલાણ્ડકોટિબ્રહ્માણ્ડભાણ્ડદણ્ડોપદણ્ડકરણ્ડમલાશાન્તોદ્દીપિત-
સગુણનિર્ગુણાતીતસચ્ચિદાનન્દપરાત્પરતારકબ્રહ્માહ્વયદશદિક્ પ્રકાશં,
સકલચરાચરાધીશમ્ ॥ ૧॥

કમલસમ્ભવશચીધવપ્રમુખનિખિલવૃન્દારકવૃન્દવન્દ્યમાનસન્દીપ્ત-
દિવ્યચારણારવિન્દં, શ્રીમુકુન્દમ્ ॥ ૨॥

દુષ્ટનિગ્રહશિષ્ટપરિપાલનોત્કટ
કપટનાટકસૂત્રચરિત્રારઞ્જિતબહુવિધાવતારં, શ્રીરઘુવીરમ્ ॥ ૩॥

કૌસલ્યાદાશરથમનોરથામન્દાનન્દકન્દલિતાધિરૂઢક્રીડા-
વિલોલનશૈશવં શ્રીકેશવમ્ ॥ ૪॥

વિશ્વામિત્રયજ્ઞવિઘ્નકારણોત્કટતાટકાસુવાહુબાહુબલવિદલન-
બાણપ્રવીણકોપપરાયણં, શ્રીમન્નારાયણમ્ ॥ ૫॥

નિજપાદજલજરજઃ કણસ્પર્શનીયશિલારૂપશાપવિમુક્ત-
ગૌતમસતીવિનુતમહીધવં, શ્રીમાધવમ્! ॥ ૬॥

ખણ્ડેન્દુધરપ્રચણ્ડકોદણ્ડખણ્ડનોદ્દણ્ડદર્દણ્ડકૌશિક-
લોચનોત્સવજનકચક્રેશ્વરસમર્પિતસીતાવિવાહોત્સવાનન્દં,
શ્રીગોવિન્દમ્ ॥ ૭॥

પરશુરામભૂજાખર્વગર્વનિર્વાપણપદાનુગતરણવિજયવર્તિષ્ણું
શ્રીવિષ્ણુમ્ ॥ ૮॥

પિતૃવાક્યપરિપાલનોત્કટજટાવલ્કલોધતસીતાલક્ષ્મણસહિત-
મહિતરાજ્યાભિમતદૃઢવ્રતસઙ્કુલિતપ્રયાણરઙ્ગગાઙ્ગાવતરણસાધનં,
શ્રીમધુસૂદનમ્ ॥ ૯॥

ભરદ્વાજોપચારનિવારિતશ્રમક્રમનિરાઘાટચિત્રકૂટપ્રવેશકક્રમં,
શ્રીત્રિવિક્રમમ્ ॥ ૧૦॥

જનકવિયોગશોકાકુલિતભરતશત્રુઘ્નલાલનાનુકૂલ-
ભરતપાદુકાપ્રદાનસુધાનિર્મિતાન્તઃકરણદુષ્ટચેષ્ટાયમાન-
ક્રૂરકાકાસુરગર્વોપશમનં, શ્રીવામનમ્ ॥ ૧૧॥

દણ્ડકાગમનવિરોધક્રોધવિરાધાનલજ્વાલાજલધરં શ્રીધરમ્ ॥ ૧૨॥

શરભઙ્ગસુતીક્ષ્ણાત્રિદર્શનાશીર્વાદનિર્વ્યાજકુમ્ભસમ્ભવ-
કૃપાલબ્ધમહાદિવ્યાસ્ત્રસમુદાયાર્જિતપ્રકાશં, શ્રીહૃષીકેશમ્ ॥ ૧૩॥

પઞ્ચવટીતટીસઙ્ઘટિતવિશાલપર્ણશાલાગતશૂર્પણખાનાસિકાચ્છેદન-
માનાવબોધનમહાહવારમ્ભણવિજૃમ્ભણરાવણનિયોગમાયામૃગસંહાર-
કાર્યાર્થલાભં, શ્રીપદ્મનાભમ્ ॥ ૧૪॥

રાત્રિઞ્ચરવરવઞ્ચનાપહૃતસીતાન્વેષણરતપઙ્ક્તિકન્થરક્ષોભ-
શિથિલીકૃતપક્ષજટાયુર્મોક્ષબન્ધુક્રિયાવસાનનિર્બન્ધનકબન્ધ-
વક્ત્રોદરશરીરનિરાદરં, શ્રીમદ્દામોદરમ્ ॥ ૧૫॥

શબર્યોપદેશપમ્પાતટહનુમત્સુગ્રીવસમ્ભાષિત બન્ધુરાદ્વન્દ્વદુન્દુભિ-
કલેવરોત્પતનસપ્તસાલચ્છેદનબાલિવિદારણપ્રસન્નયુગ્રીવ-
સામ્રાજ્યસુખમર્ષણં, શ્રીસઙ્કર્ષણમ્ ॥ ૧૬॥

સુગ્રીવાઙ્ગદનીલજામ્બવત્પનસકેસરિપ્રમુખનિખિલકપિનાયકસેના-
સમુદાયાર્ચિતસેવં, શ્રીવાસુદેવમ્ ॥ ૧૭॥

નિજદત્તમુદ્રિકાજાગ્રત્સમુગ્રાઞ્જનેયવિનયવચનરચનામ્બુધિ-
લઙ્ઘિતલઙ્કિણીપ્રાણોલ્લઙ્ઘનજનકજાદર્શનાક્ષકુમારમારણ
લઙ્કાપુરીદહનતત્પ્રતિષ્ઠિત-
સુખપ્રસઙ્ગધૃષ્ટદ્યુમ્નં, શ્રીપ્રદ્યુમ્નમ્ ॥ ૧૮॥

અગ્રજોદગ્રમહોગ્રનિગ્રહપલાયમાનાપમાનનીયનિજશરણ્યાગણ્યપુણ્યોદય-
વિભીષણાભયપ્રદાનાનિરુદ્ધં, શ્રીમદનિરુદ્ધમ્ ॥ ૧૯॥

અપારલવણપારાવારસમુજ્જૃમ્ભિતોત્કરણગર્વનિર્વાપણદીક્ષાસમર્થ-
સેતુનિર્માણપ્રવીણાખિલનરસુરોત્તમં, શ્રીપુરુષોત્તમમ્ ॥ ૨૦॥

નિસ્તુલપ્રહસ્તકુમ્ભકર્ણેન્દ્રજિત્કુમ્ભનિકુમ્ભાગ્નિવર્ણાતિકાયમહોદર-
મહાપાર્શ્વાદિદનુજતનુખણ્ડનાયમાનકોદણ્ડગુણશ્રવણશોષણહતશેષ-
રાક્ષસવ્રજં, શ્રી અધોક્ષજમ્ ॥ ૨૧॥

અકુણ્ઠિતરણોપકણ્ઠદશકણ્ઠદનુજકણ્ઠીરવકણ્ઠલુણ્ઠનાયમાનજયાર્હં,
શ્રીનારસિંહમ્ ॥ ૨૨॥

દશગ્રીવાનુજપટ્ટભદ્રત્વશક્યવિભવલઙ્કાપુરીસ્ફુરણસકલસામ્રાજ્ય-
સુખોર્જિતં, શ્રીમદચ્યુતમ્ ॥ ૨૩॥

સકલસુરાસુરાદ્ભુતપ્રજ્વલિતપાવકમુખપૂતાયમાનસીતાલક્ષ્મણાનુગત-
મહનીયપુષ્પકાધિરોહણ નન્દિગ્રામસ્થિતભ્રાતૃભિર્યુતજટાવલ્કલ-
વિસર્જનામ્બરભૂષણાલઙ્કૃતશ્રેયોવિવર્ધનં, શ્રીજનાર્દનમ્ ॥ ૨૪॥

અયોધ્યાનગરપટ્ટાભિષેકવિશેષમહોત્સવનિરન્તરદિગન્તવિશ્રાન્તહારહીર-
કર્પૂરપયઃપારાવારાપારાભવાણી કુન્દેન્દુમન્દાકિનીચન્દનસુરધેનુ-
શરદમ્બુદાલીશરદમ્ભોલી શતધારાધાવલ્યશુભકીર્ત્તિચ્છટાન્તર-
પાણ્ડુરીભૂતસભાવિભ્રાજમાનનિખિલભુવનૈકસાન્દ્રયશસ્સાન્દ્રં,
શ્રી ઉપેન્દ્રમ્ ॥ ૨૫॥

ભક્તજનસંરક્ષણદીક્ષાકટાક્ષસુખોદયસમુત્સારિં, શ્રીહરિમ્ ॥ ૨૬॥

કેશવાદિ ચતુર્વિંશતિનામગર્ભસન્દર્ભોચિતનિજ-
કથાઙ્ગીકૃતમેધાવતિષ્ણં, શ્રીકૃષ્ણમ્ ॥ ૨૭॥

સર્વસુપર્વપાર્વતીહૃદયકમલતારકબ્રહ્મનામં, શ્રીસમ્પૂર્ણકામમ્ ॥ ૨૮॥

ભવતરણાનુયશસ્સાન્દ્રં ભવજનિતભયોચ્છેદવિચ્છાત્રમચ્છિદ્રં
ભક્તજનમનોરથોન્નિદ્રં, શ્રીભદ્રાચલરામભદ્રમ્ ॥ ૨૯॥

ૐ શ્રીરામભદ્રાય નમઃ ।

ઇતિ શ્રીરામદણ્ડકં સમાપ્તમ્ ।

Encoded and proofread by PSA Easwaran

*Shri Ramadandakam*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*